**2.4.6** नूतनकार्यक्रमाणाम्/उदयमान-क्षेत्राणां (शोधपत्राणि, परियोजनाः, परामर्शः, प्रशिक्षणानुभवः, धर्मशास्त्रं, सांस्कृतिकपर्यटनं, सङ्गणकीय-भाषाशास्त्रं, सङ्गणकीय-संस्कृतम्, अनुवादाध्ययनं, तोलनिकं दर्शनं, तोलनिकं सौन्दर्यशास्त्रं, योगविज्ञानम्, योगदर्शनं, संस्कृतपत्रकारिता, संस्कृतमातृकाशास्त्रम्, प्रबन्धनशास्त्रं, विधिशास्त्रं, देवालयसंस्कृतिः प्रशासनं च, भैषज्यज्योतिषं, वास्तुशास्त्रम् इत्यादीनाम्) अध्यापनाय अध्यापकाः उपलभ्यन्ते।

***Faculty are available for new programmes/ emerging areas of study such as Research papers, Projects, Consultancy, Prashikshan-Experience, Dharmashastra, Cultural Tourism, Computational linguistics, Computational Sanskrit, Translation Studies, Comparative Philosophy, Comparative Aesthetics, Yogic Science, Yoga Darshan, Samskrit Journalism, Sanskrit manuscriptology, Management, Jurisprudence, Temple Culture and Administration, Vastushastra, Medicinal Astrology etc.***

---

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये नूतनकारकाणाम् उदयमान-क्षेत्राणानां तद्यथा (शोधपत्राणि, परियोजनाः, परामर्शः, प्रशिक्षाणानुभवः, धर्मशास्त्रं, सांस्कृतिकपर्यटनं, संगणकीयभाषाशास्त्रं, संगणकीय-संस्कृतं, अनुवादाध्ययनं, तोलनिकं दर्शनं, तोलनिकं सौन्दर्यशास्त्रं, योगविज्ञानं, योगदर्शनं, संस्कृतपत्रकारिता, संस्कृतपाण्डुलिपिविज्ञानं, प्रबन्धनं, न्यायशास्त्रं देवालयसंस्कृतिः प्रशासनं च, भैषज्यज्योतिषं, वास्तुशास्त्रम् इत्यादीनाम्) सर्वेषां विषयाणाम् अध्यापनाय अध्यापकाः समुपलब्धाः सन्ति।

**शोधपत्राणि –** 'सारस्वती सुषमा' इति पत्रिका अस्मिन् एव विश्वविद्यालये प्रकाशिता भवति। अस्यां पत्रिकायां विश्वविद्यालयस्य बहिस्थानामपि च विदुषां शोधपत्राणि प्रकाशीभवन्ति। एतेषां शिक्षकाणां लेखाः उत्कृष्टाः भवन्ति। अत्रत्यानां शोधच्छात्राणामपि शोधलेखा पत्रिकासु प्रकाश्यन्ते। श्रमणविद्यासङ्काये सङ्कायस्तरीया शोधपत्रिका प्रकाश्यते। तस्यां सङ्कायशोधपत्रिकायां विश्वविद्यालयस्य सर्वविभागस्य छात्राः अध्यापकाः स्वस्वशोधपत्राणि विलिख्य प्रकाशयन्ति।

**परियोजना –** उत्तरप्रदेशसर्वकारस्य उच्चशिक्षाविभागेन 'रिसर्च एण्ड डेवलपमेण्ट' योजनान्तर्गतम् अस्य विश्वविद्यालयस्य डॉ. विजयकुमारशर्मणे, सहायकाचार्याय वेदविभागस्य 'पंचविध सूत्र एवं मात्रालक्षण का सानुवाद समीक्षण' विषये लघुशोधपरियोजना स्वीकृता। केन्द्रीयसंस्कृतविश्वविद्यालयस्य अनुदानप्रदानयोजनान्तर्गतं डॉ. मधुसूदनमिश्राय, सहायकाचार्याय, ज्योतिषविभागस्य, 'अष्टादशी' प्रोजेक्ट

2021-22 स्वीकृतम्। अखिल-भारतीय-तकनीकी-शिक्षापरिषदः अन्तर्गते भारतीयज्ञानपरम्पराक्रमे चतुष्षष्टिकलानां विषये विशेषाध्ययनार्थम् एका परियोजना स्वीकृता विद्यते। अस्यां परियोजनायां विंशत्यधिकाः अध्यापकाः छात्राश्च प्राच्यग्रन्थेषु प्रस्तुतपरियोजनामाध्यमेन चतुष्षष्टिकलाविषयकतत्त्वानां समाजहिताय सङ्कलीकरणं कुर्वन्तः सक्रियाः सन्ति।

**परामर्शः-** अस्य विश्वविद्यालयस्य ज्योतिषविभागे एकः **'ज्योतिष एवं वास्तु परामर्श केन्द्रम्'** उद्घटितं वर्तते यस्मिन् ज्योतिषशास्त्रस्य दृष्ट्या जनेभ्यः परामर्शः दीयते। अयं प्रकल्पः ज्योतिषविभागीयानाम् आचार्याणां निर्देशने एव प्रचलति।

**प्रशिक्षणानुभवः-**विश्वविद्यालये अध्ययनाध्यापनेन सह प्रशिक्षणकार्यक्रमाः विशेषरूपेण सञ्चालिताः भवन्ति। छात्रेभ्यः संस्कृतसंभाषणप्रशिक्षणं शिविरमाध्यमेन प्रदीयते। शोधे पञ्जीकृतानां छात्राणाङ्कृते षण्मासात्मकपाठ्यक्रमाय विशेषप्रशिक्षणकार्यक्रमः समायोज्यते । तत्र अत्रत्यैः अध्यापकैः अन्यविश्वविद्यालयस्य अध्यापकैश्च शोधकार्यकरणाय प्रशिक्षणं प्रदीयते।

**धर्मशास्त्रम् –** विश्वविद्यालयेऽस्मिन् धर्मशास्त्राध्ययनाध्यापनाय स्वतन्त्रः एको विभागोऽस्ति। अस्मिन् विभागे भारतीयज्ञानपरम्परायां तत्त्वभूतानां स्मृतिग्रन्थानां दृष्ट्या सर्वे भारतीयसंस्काराः हिन्दूसंस्कृतिश्च सूक्ष्मदृष्ट्या पाठ्यन्ते।

**सांस्कृतिकपर्यटनम् –** छात्राणाम् अध्यापकानां च नूतनानुभवो ज्ञानञ्च भवेदिति हेतुना छात्रैः सह अध्यापकाः अपि सांस्कृतिकपर्यटनस्थलेषु गत्वा स्वानुभवे ज्ञानवृद्धिं कुर्वन्ति।

**सङ्गणकीयं भाषाशास्त्रम् –** सङ्गणकीयभाषाशास्त्रानुगुणं संगणकस्य अध्ययनाध्यापनमपि विश्वविद्यालये भवति। शोधछात्राणां कृते विशेषतया सङ्गणकप्रशिक्षणं प्रदीयते।

**सङ्गणकीयं संस्कृतम् –** अयं विश्वविद्यालयः संस्कृताध्ययनेन सहैव संरक्षणकाध्ययनं प्रति अपि ध्यानं केन्द्रीकरोति। शास्त्रिकक्षायां तु संस्कृताध्ययनेन सह सङ्गणकमनिवार्यं कृतं वर्त्तते। विश्वविद्यालये संस्कृतेन सह सङ्गणकस्य प्रशिक्षणार्थं एका सङ्गणकशाला अपि निर्मिता वर्त्तते यत्र गत्वा छात्राः सङ्गणकस्य प्रशिक्षणं प्राप्नुवन्ति।

**अनुवादाध्ययनम्-** अस्य विश्वविद्यालयस्य अध्यापकाः अनुवादस्य अध्ययने दत्तचित्ताः सन्ति। अनुवादाध्ययनस्य कृते यथावसरं विश्वविद्यालयः संस्कृतकार्यशालाः, संस्कृतसम्भाषणशिविराणि च आयोजयति।

**तोलनिकं दर्शनम् -** अस्मिन् विश्वविद्यालये एकः तुलनात्मकदर्शनविभागो वर्त्तते। अत्र विभागे सर्वेषां दर्शनानां तुलनात्मकम् अध्ययनम् अध्यापनं क्रियते। बहवः शोधच्छात्रा अपि दर्शनानां तुलनात्मकदृशा शोधकार्यमत्र विभागेऽकुर्वन्

**तोलनिकं सौन्दर्यशास्त्रम् –** दीनदयालउपाध्यायकौशलकेन्द्र केन्द्रीय छात्राः गृहसज्जाविषयकं सौन्दर्यशास्त्रं पठन्ति। एवञ्च साहित्यविभागे साहित्यग्रन्थेषु प्राकृतिकं सौन्दर्यं, पात्राणां पारस्परिकं सौन्दर्यम्, परिधानानां सौन्दर्यम् इत्यादिविषयान् आश्रित्य सौन्दर्यतुलनात्मकम् अध्ययनं कार्यते।

**योगविज्ञानं, योगदर्शनम्-** दर्शनविभागे एव योगदर्शनस्यापि विधिवदध्ययनम् अध्यापनञ्च भवति। योगस्य लक्षणम्, स्वरूपम्, फलम्, लाभालाभौ इति योगदर्शने दर्शितः सर्वोऽपि विषयोऽस्मिन् विभागे निष्णातैः आचार्यैः अध्याप्यते।

**संस्कृतपत्रकारिता –** अस्मात् विश्वविद्यालयतः 'गाण्डीवम्' इति एका संस्कृतपत्रिका प्रकाश्यते। तत्र विशिष्टानां विदुषां लेखाः प्रकाश्यन्ते।

**संस्कृतपाण्डुलिपिविज्ञानम् -** संस्कृतस्य प्रचुरपाण्डुलिपयः अस्य विश्वविद्यालयस्य 'पाण्डुलिपिभवने' समुपलब्धाः वर्त्तन्ते। छात्राः अध्यापकाश्च स्वविद्यावैभववर्धनाय हस्तलेखागारं गत्वा पाण्डुलिपिं यथासमयं पश्यन्ति पठन्ति च।

**प्रबन्धनम् –** अस्य विश्वविद्यालयस्य पाठ्यक्रमेषु प्रबन्धनस्य विषयः अपि पाठ्यते । कौटिल्यस्य अर्थशास्त्रे अर्थविषयकप्रबन्धस्य विषयः समुपलभ्यते। यस्य पठनं पाठनं राजनीति एवं अर्थशास्त्रविभागे भवति। वेदविभागीय पाठ्यक्रमेषु न केवलं जलप्रबन्धनम् अपितु वनप्रबन्धनस्यापि विशेषचर्चा समुपलभ्यते। साहित्यविषये करप्रबन्धनमपि पाठ्यक्रमस्य भागः अस्ति।

**विधिशास्त्रम् –** विश्वविद्यालयेऽस्मिन् प्राच्यविधिशास्त्रस्य अध्ययनाध्यापनं क्रियते। विशेषतः विधिशास्त्रविषये मनुस्मृतौ, याज्ञवल्क्यस्मृतौ चेत्यादिषु शास्त्रेषु विधिविषयस्य व्यापिका चर्चा विद्यते।

**देवालयसंस्कृतिः प्रशासनं च –** विश्वविद्यालयस्य परिसरे पञ्चदेवमन्दिरम्, वाग्देवी मन्दिरम्, इत्यादि दशाधिकानि मन्दिराणि वर्त्तन्ते येषां प्रबन्धनं छात्रैः अध्यापकैश्च क्रियते। देवालये प्राणप्रतिष्ठितानां देवानां शास्त्रवर्णितदेवगुणानुकूलेन पूजासंस्कृतिः सञ्चाल्यते एवं तत्तद्देवस्वरूपोचितपूजाव्यवस्थायाः प्रशासनिककार्यमपि अत्रत्यैः छात्रैः अध्यापकैश्च क्रियते। मन्दिरस्य शासनव्यवस्थासुदृढीकरणार्थं मन्दिरव्यस्थापकपदे अध्यापकाः नियोजिताः सन्ति।

**भैषज्यज्योतिषम् –** भैषज्यज्योतिषसिद्धान्तमनुसृत्य पाणिनिभवनस्य पार्श्वभागे 'नवग्रहवाटिकायाः' स्थापना जाता विद्यते। तत्र ज्योतिषशास्त्रस्य कालगणनादिशा वनस्पतीनां रोपणं जातमस्ति।

**वास्तुशास्त्रम् –** विश्वविद्यालयस्य ज्योतिषविभागे, दीनदयालउपाध्याय-कौशल-केन्द्रे, ऑनलाइनसंस्कृतप्रशिक्षणकेन्द्रे च वास्तुशास्त्रविषयकम् अध्ययनाध्यापनं भवति।